## भीस्म्योर्हेतुभये। (६८/२५९४)

णेः इति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये। हेतुः प्रयोजकः कर्ता लकारवाच्यः, ततश्चेद् भयं भवति। भयग्रहणमुपलक्षणार्थम्, विस्मयोऽपि तत एव। [1]जटिलो भीषयते। मुण्डो भीषयते। जटिलो विस्मापयते। मुण्डो विस्मापयते[2]। हेतुभये इति किम्? [3]कुञ्चिकयैनं भाययति। रूपेण [4]विस्माययति। [5]अत्र कुञ्चिका भयस्य करणम्[6], न हेतुः॥

## गृधिवञ्च्योः प्रलम्भने। (६९/२७३९)

णेः इति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। 'गृधु अभिकाङ्क्षायाम्' (धा.पा. १२४७), 'वञ्चु गतौ' (धा. पा. १८९) [7]इत्येतयोर्ण्यन्तयोः प्रलम्भने वर्तमानयोरात्मनेपदं भवति। प्रलम्भनम् विसंवादनं, मिथ्याफलाख्यानम्। माणवकं गर्धयते। [8]माणवकं वञ्चयते। प्रलम्भने इति किम्? श्वानं [9]गर्धयति। गर्धनमस्योत्पादयति इत्यर्थः। अहिं वञ्चयति। परिहरति इत्यर्थः॥

## लियः संमाननशालीनीकरणयोश्च। (७०/२५९२)

णेः इति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। 'लीङ श्लेषणे' (धा. पा. ११३९) इति दिवादौ पठ्यते 'ली श्लेषणे' (धा.पा.१५०१)इति[10]च क्र्यादौ। विशेषाभावाद् द्वयोरपि[11] ग्रहणम्। लियो ण्यन्तात् संमानने शालीनीकरणे च वर्तमानादात्मनेपदं भवति। चशब्दात् प्रलम्भने च। सम्माननं [12]पूजनम्–जटाभिरालापयते। पूजां [13]समधिगच्छति इत्यर्थः। [14]शालीनीकरणं न्यग्भावनम्–श्येनो वर्तिकामुल्लापयते। न्यक्करोति इत्यर्थः। प्रलम्भने[15]–कस्त्वामुल्लापयते। [16]विसंवादयति इत्यर्थः। 'विभाषा लीयतेः' (६.१.५१/२५०९) इति [17]वा आत्वं विधीयते। तदस्मिन् विषये नित्यमन्यत्र विकल्पः। व्यवस्थितविभाषा हि सा[18]। सम्माननादिषु इति किम्? बालकमुल्लापयति॥

## मिथ्योपपदात् कृञोऽभ्यासे। (७१/२७४०)

णेः इति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। ण्यन्तात् करोतेर्मिथ्योपपदादात्मनेपदं भवति अभ्यासे। [19]अभ्यासः [20]पुनः पुनः करणम्, आवृत्तिः। पदं मिथ्या कारयते। [21]सापचारं स्वरादिदुष्टमसकृदुच्चारयति इत्यर्थः। [22]मिथ्योपपदात् इति किम्? पदं सुष्ठु कारयति। कृञः इति किम्? पदं मिथ्या वाचयति। अभ्यासे इति किम्? पदं मिथ्या कारयति। [23]सकृदुच्चारयति॥

---

1. भियो हेतुभये षुक् (7. 3. 40/2595) इत्यधिकम् क. 2. नित्यं स्मयतेः इत्याकारः इत्यधिकम् अ. क. ड. 3. कुञ्चिकयैनं भापयति ब. ई, भीषयति अ. 4. विस्मापयति ब. ड. 5. अत्र––हेतुः नास्ति ब. क. फ. ई. 6. कारणम् ड. 7. एतयोः नास्ति क, ण्यन्तयोः नास्ति ड. फ. 8. उदाहरणमिदं नास्ति ड. 9 बन्धयते ब. 10. च नास्ति फ, इति च क्र्यादौ पठ्यते अ. ह. 11. अपि नास्ति फ. 12. संपूजनम् अ. 13. अधिगच्छति फ. 14. शालीनीकरणस्य भावनं अ, शालीनीकरणे फ. 15. खल्वपि इत्यधिकम् क. 16. कोऽपि विसंवादयति नित्यं वादयति क. 17. अणा वा ब, इत्यात्वं णौ विभाषा क. ड. ह. 18. असौ फ, सा नास्ति ई, व्यवस्थितविभाषया ह्यसौ क. 19. अभ्यासः–आवृत्तिः नास्ति क. 20. पुनर्ग्रहणं क, युगकरणम् ब. 21. सापचारे ब. ई, सदोषं अ. पमं, सदोषं सापचारं क. 22. मिथ्योपपदात्–उच्चारयति नास्ति अ. 23. उच्चरति क, उच्चारति इति ब.